# कैवल्योपनिषदोक्तदिशा आत्मतत्त्वविचारः

**Saranya C K**
Research Scholar, Department of Vedanta,
Sree Shankaracharya University of Sanskrit,
Kalady, Ernakulam, Kerala, India
Email: saranyack2014@gmail.com

**Abstract:** विश्वे भारतीयदर्शनस्य महत्तमेषु योगदानेषु अन्यतमं भवति उपनिषद्। उपनिषद् पराविद्या इति पदेन व्यपदिश्यते। वेदान्तिभिः उपनिषद् इत्याख्यायते।उपनिषच्छब्दस्य रहस्यमर्थः,अध्यात्मविद्यारहस्यप्रतिपादकाः वेदभागाः उपनिषदःकथ्यन्ते। तासु महर्षयः आध्यात्मिक्या विद्यया गूढतमानां रहस्याणां विशदतयाविचारं कुर्वाणाः प्राप्यन्ते। भारतीयदर्शनसाहित्ये सन्ति त्रयः प्रस्थानग्रन्थाः। ते वेदान् अवलम्बमानाः मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्तिसाधनञ्च उपदिशन्ति। भारतीयविचारशास्त्रस्य श्रेष्ठोपजीव्यग्रन्थत्वादुपनिषदः प्रस्थानत्रय्यांप्रथमप्रस्थानत्वेन गृह्यन्ते। श्रीमद्भगवद्गीता द्वितीयं प्रस्थानमिति। गीतायाः द्वितीयप्रस्थानत्वम् तस्यामेव प्रकटितम् अस्ति। बादरायणव्यासप्रणीतं ब्रह्मसूत्रंतृतीयप्रस्थानमस्ति। ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तैत्तिरीयऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषदः मुख्याः दशोपनिषदः भवन्ति। ब्रह्मतत्त्व प्रतिपादनं सर्वासु उपनिषत्सु विद्यते। तथैव शैवदर्शने अपि उपनिषदानां प्रमुखा भूमिका वर्तते।शैवदर्शनस्य मुख्यौ आधारभूत ग्रन्थौ उपनिषद्, वेदाश्च। मुख्याः चतुर्दशशैवोपनिषदाः वर्तन्ते। तासु उपनिषत्सु कैवल्योपनिषद् एका मुख्या उपनिषद्भवति। अस्याः कैवल्योपनिषदः महत्ता का, आत्मतत्त्वविचारः मोक्षः च कथंनिरूपयति इति अस्मिन् शोधपत्रे विश्लेषणात्मकरूपेण ज्ञातुं प्रयतते।

**Keywords:** उपनिषद्, शैवोपनिषद्, कैवल्योपनिषद्, आत्मतत्त्वविचारः, मोक्षः।

**उपोद्घातः—**

उपनिषद् पराविद्या इति पदेन व्यपदिश्यते। वेदान्तिभिः उपनिषद् इत्याख्यायते। उपनिषच्छब्दस्य रहस्यमर्थः, अध्यात्मविद्यारहस्यप्रतिपादकाः वेदभागाः उपनिषदः कथ्यन्ते। तासु महर्षयः आध्यात्मिक्या विद्यया गूढतमानां रहस्याणां विशदतया विचारं कुर्वाणाः प्राप्यन्ते। भारतीयदर्शनसाहित्ये सन्ति त्रयः प्रस्थानग्रन्थाः। ते वेदान् अवलम्बमानाः मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्तिसाधनञ्च उपदिशन्ति। भारतीयविचारशास्त्रस्य श्रेष्ठोपजीव्यग्रन्थत्वादुपनिषदः प्रस्थानत्रय्यां प्रथमप्रस्थानत्वेन गृह्यन्ते। श्रीमद्भगवद्गीता द्वितीयं प्रस्थानमिति। बादरायणव्यासप्रणीतं ब्रह्मसूत्रं तृतीयप्रस्थानमस्ति। तत्र आपाततो विरोधिभूतानाम् उपनिषद्वाक्यानां समन्वयस्तथा कृतः, येन ज्ञातं स्यात् तेषां सर्वेषामपि वाक्यानां ब्रह्मनिष्ठत्वम्। अथ च तत्र तार्किकाणां युक्तयः अपि प्राबल्येन निराकृताः सन्ति। भारतीयाः वैदिकधर्मग्रन्थाः, दर्शनानि च इमामेव प्रस्थानत्रयीमवलम्बन्ति। उपनिषदां गीताब्रह्मसूत्रयोराश्रयप्रदायिनीत्वात् ताः सन्ति महनीयतमाः। उप-नि-पूर्वकस्य विशरणगत्यवसादनार्थकस्य 'षद्लृ'-धातोः क्विबन्तस्य रूपमिदमुपनिषदिति। उपनिषदाम् अध्ययनेन दृष्टानुश्रविकविषयवितृष्णमुमुक्षूणां संसारस्य बीजभूता विद्या नश्यति, ब्रह्म प्राप्तं भवति दुःखानि च क्षीणानि

भवन्ति। ब्रह्मणः स्वरूपस्य तदवाप्त्युपायस्य जीवस्य जगतश्च किञ्चात्मादिविषयाणां सविस्तरं वर्णनपरत्वात् 'उपनिषद्' इति संज्ञा। सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्' इत्येतत् मुक्तिकोपनिषद्वाक्येन उपनिषदष्टोत्तरशततोऽप्यधिकाः आसन् इति ज्ञायते। प्राप्तासु अष्टोत्तरशतसंख्याकासु उपनिषत्सु प्रायेण द्वादश उपनिषदः प्राचीनत्वाद् विशदतया च विषयस्य प्रतिपादकत्वाद् अतितरां प्रामाणिकाः मताः भवन्ति। तत्र १० उपनिषदः ऋग्वेदसम्बद्धाः, १९ उपनिषदः शुक्लयजुर्वेदसम्बद्धाः, ३२ कृष्णयजुर्वेदसम्बद्धाः, १६ सामवेदसम्बद्धाः, ३१ अथर्ववेदसम्बद्धाः। वेदान्ताचार्या एतासु उपनिषत्सु कतिचनोपनिषदः स्वमतानुसारिण्यया" व्याख्यया भूषितवन्तः। तासु दशोपनिषदः प्रसिद्धाः। मुण्डिकोपनिषदि उपनिषदां संख्या निम्नरूपेण वर्णिताऽस्ति –

"ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।
ऐतरेयञ्च छान्दोग्यं बृहदारण्यकं दश।।" इति।

एतासु दश उपनिषत्सु प्रसिद्धाः — ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तैत्तिरीयऐतरेय-छान्दोग्य-बृहदारण्यकोपनिषदः। श्वेताश्वतरोपनिषदेकादश्यपि प्रसिद्धा। यथा वेदान्तशास्त्राणां आधारभूत ग्रन्थरूपेण उपनिषदाः वेदाश्च वर्तन्ते तथा शैवदर्शनानां आधारग्रन्थरूपेण उपनिषद् वेदाश्च विद्यन्ते। शैवोपनिषदः हैन्दवधर्मस्य अन्तः लघूपनिषदानां समूहः अस्ति, यः विशेषतया शैवदर्शने केन्द्रितः भवति , तथा च वैदिकपरम्परामूलभूतैः त्रयोदशप्राचीनप्रधानोपनिषदैः भिन्नः अस्ति। मुख्याः चतुर्दश शैवोपनिषदाः वर्तन्ते।

**विषयसंक्षेपः—**

**शैवोपनिषद्**

शैवोनिषदः शैवदर्शन सम्बन्धानां १४ लघूपनिषदानां समूहः अस्ति। यस्य कालः प्रथमसहस्राब्दस्य अन्तिमशताब्द्याः आरभ्य १७ शताब्द्याः यावत् विविधरूपेण भवति। मुख्याः १५ शैवोपनिषदाः वर्तन्ते। अक्षमालिकोपनिषद्, अथर्वशिखोपनिषद्, अथर्वशिरउपनिषद्, कालाग्निरुद्रोपनिषद्, कैवल्योपनिषद्, गणपत्युपनिषद्,जाबाल्युपनिषद्,दक्षिणामूर्त्युपनिषद्,पञ्चब्रह्मोपनिषद्,बृहज्जाबा-लोपनिषद्,भस्मजाबालोपनिषद्,रुद्रहृदयोपनिषद्,द्राक्षजाबालोप-निषद्, शरभोपनिषद्, श्वेताश्वतरोपनिषद्। शैवोपनिषदि शिवस्य आध्यात्मिकम् अपरिवर्तनीय वास्तविकता ब्रह्म(आत्मा) इति स्तुवन्ति। शिवसम्बद्धानां संस्काराणां प्रतीकानाञ्च विषये खण्डाः अपि समाविष्टाः सन्ति। एतासु शैवोपनिषत्सु कैवल्योपनिषद् मुख्यस्थानमावहति।

**कैवल्योपनिषद्**

शैवोपनिषत्सु कैवल्योपनिषद् ह्रस्वा भवति। इयम् उपनिषद् द्विधा विद्यते। एकः कृष्णयजुर्वेद सम्बन्धः अपरः अथर्ववेद सम्बन्धश्च। अस्याम् उपनिषदि शिवस्य महिमां द्योतयति। स्पष्टं, संक्षिप्तं, काव्यात्मकं, गम्भीरं, दार्शनिक तत्त्वानां समन्वयः अस्यामुपनिषदि वर्तते। उपनिषदि वेदान्तदर्शनस्य सारः भवति । एकान्तः, त्यागः च मनुष्यस्य व्यक्तिगत-आध्यात्मिक-यात्रायां, संसारात् विरक्तस्य आन्तरिक-स्थितेः वर्णनं कुर्वन्ति। वेदान्ते शैवदर्शनस्य प्रस्तुतिः,आत्मब्रह्मणोः तस्य सम्बन्धः, कैवल्यमार्गत्वेन आत्मज्ञानं च कैवल्योपनिषदि वर्णितम्। कैवल्यमिति संस्कृतपदेन एकान्तः इति विवक्षितम्। लौकिककामानां च सर्वप्रवृतीनां परित्यागः एकान्तवासिनं कञ्चित् निर्दिशति। ड्यूसन् [1]एवमुक्तम् "कैवल्योपनिषद् पञ्च उपनिषद् समूहात् आगता"। इयमुपनिषद् आत्मनः सूचकरूपेण शिवं प्रकीर्तयति

दृढयति च। एताः पञ्च उपनिषदाः अथर्वशिरस् , नीलरुद्रा, कालाग्निरुद्रा, कैवल्यं च। ताः च प्राचीनाः भवन्ति। कैवल्योपनिषदमपि श्वेताश्वतर नारायण उपनिषदः समानकाले एव लिखिता इति कथ्यते। कैवल्योपनिषदः Manuscript भिन्नाः वर्तन्ते। तत् कस्य वेदस्य सम्बन्धः इति अवलम्बते। कृष्णयजुर्वेद सम्बन्धे २६ श्लोकाः वर्तन्ते। अथर्ववेद् सम्बन्धे २४ श्लोकाश्च। एतौ द्वौ समानसन्देशः प्रसारयतः। किन्तु पूर्वम् एकप्रकरणत्वेन उत्तरं च द्वयोः अध्याययोः (प्रथमे १९ श्लोकाः, द्वितीये ५ श्लोकाः)।

पाठः श्लोकरूपेण संरचितः अस्ति, काव्यवैदिकमीटर् (गीतं प्रति श्लोके अक्षराणां संख्या सम्यक् समाना) इति स्थापिता। वैदिक ऋषिः आश्वलायनः ब्रह्मदेवश्च भाषण रूपेण उपनिषदः आरम्भः वर्तते। तत्र आश्वलायनः ब्रह्मणा ब्रह्मविद्यां याचते। तदेव परमतत्त्वस्य ज्ञानं ब्रह्म। तथा प्रारम्भिकोपनिषदः श्लोकानां प्रमुखान् अंशान् समावेशयन् तद्वारा तस्य सन्देशः निर्माति इति कारणेन उपनिषदः स्वरूपः उत्तमा। शैवदर्शनस्य प्रस्तुतीकरणार्थं वेदान्तपदाः उपयुज्य आत्मा, ब्रह्म, कैवल्यम् इत्येतेषां मार्गसाधकत्वेन आत्मज्ञानस्य चर्चायै इयमुपनिषद् मुख्या भवति।

**ब्रह्मस्वरूपम्—**

कैवल्योपनिषदि परमपुरुषार्थरूपस्य मोक्षस्य उपायत्वेन आत्मतत्वविचारः विशेषेण निरूपितमस्ति। कैवल्यम् इति शब्दः केवलत्वं, अद्वितीयत्वं, ब्रह्मैक्यावस्थां च बोधयति । अत्र मोक्ष एव कैवल्यशब्देन अभिधीयते । आत्मा अस्य मोक्षस्य कारणं, साध्यं, साधनं च भवति। कैवल्योपनिषदि आत्मा कः इति प्रश्नः स्पष्टरूपेण निरुप्यते। आत्मा इति पदं वेदेषु, उपनिषत्सु च वारं वारं प्रयुज्यते। तत्र आत्मा कः ? किमस्य स्वरूपम् ? सः कथं ज्ञेयः ? इत्येते प्रश्नाः अत्यन्तं गम्भीराः अध्यात्मदृष्ट्या च परमप्रशस्ताः। एषा उपनिषद् शिवोपासक परम्परायां प्रसिद्धा, यत्र शिवः एव आत्मस्वरूपेण प्रतिष्ठितः दृश्यते। आत्मा न शरीरे स्थितः कश्चन द्रव्यात्मकः पदार्थः, किन्तु सः नित्यः, निराकारः, सर्वगतः, सर्वशक्तिमान् च। पुरा एषा व्यवस्था आसीत् यत्र जिज्ञासवः शिष्याः गुरुम् अन्विष्य साक्षात् गुरोः ज्ञानसम्पादनम् अर्जयन्ति स्म। तदनुसारेण आश्वलायनः नाम शिष्यः ब्रह्मविद्या अध्ययनाय ब्रह्मणोः समीपम् आगतः। तदा ब्रह्मणा इत्थमुक्तम्—

"तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यान योगादवेहि।
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः॥"[2] इति।

अर्थात् ब्रह्मविद्या अध्ययनार्थं श्रद्धा , भक्तिः , ध्यानं च मुख्याः भवन्ति। अतः एतेषां त्रयाणां साहाय्येन सर्वं अवगच्छन्तु इति ब्रह्मणः उक्तम्।

"वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे॥"[3] इति।

'अमृतं वै ब्रह्म', 'अम्सत्वेन ना अमृतत्वेननास्ति' इति अमृतस्वरूप विषये वेदान्तिना उक्तम्। ब्रह्मैव अमृतम् इत्युक्ते ब्रह्मसात्मीकरणं अमृतावस्था इति अवगच्छेयुः । अमृतत्वप्राप्ते सति अनावश्य आशायाः न अवशिष्यते ।

"अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम्।
तदादिमध्यान्तविहीनमेकं विमुं चिदानन्दमरूपमद्भुतम्॥"[4] इति।

अचिन्त्यं अबोध्यं अनन्तरूपं शान्तं ब्रह्मार्धराज्येश्वरं च शिवं स्मरन् योगी सर्वसाक्षिणः भूतमहेश्वरस्य निःसंदेहं सर्वाज्ञानं सन्निधिं प्राप्नोति। ब्रह्मस्वरूपं कथं प्राप्नोति इति चेत् , दशमश्लोके

इत्थमुक्तम्—

"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि
संपश्यन् ब्रह्म परम याति नान्येन हेतुना ॥"[5] इति।

सर्वेषु भूतेषु आत्मानं पश्यन् तथा स्वात्मानं सर्वभूतेषु यः पश्यति सः एव परब्रह्मस्वरूपमाप्नोति। न अन्यथा पन्था युज्यते। आत्मतत्त्वस्य ज्ञानं केवलं वेदान्तविचारेण, गुरुपदेशेन तथा च योगमार्गेण लभ्यते इत्यपि निरूप्यते। विशेषतः गुरुं विना आत्मज्ञानम् अशक्यम् इति दृढतया प्रतिपाद्यते । अत्र श्रद्धा, भक्तिः, ध्यानं च आत्मसाक्षात्काराय साधनानि इति रूपेण निर्दिष्टानि। कैवल्योपनिषद् आत्मानं ब्रह्मरूपं दर्शयति। आत्मा एव ब्रह्म, न तु भिन्नः इति अद्वैतविचारोऽत्र प्रबलः अस्ति। आत्मदर्शनं ब्रह्मदर्शनमेव। कैवल्यशब्देन मोक्ष एव संकेतितः। आत्मज्ञानात् परं किमपि कर्तव्यं नास्ति। आत्मज्ञानस्य फलं कैवल्यं, परिपूर्णस्वतन्त्रता, नित्यशान्तिः, अविद्यात्मकबंधननिवृत्तिः च। यद्यपि कैवल्योपनिषद् अथर्ववेदे अन्तर्भवति तथापि अस्य दर्शनं पूर्णतया अद्वैतपरं दृश्यते । आत्मा ब्रह्म एव , जीवः ब्रह्मैव, ज्ञानं मोक्षः, गुरुं विना ज्ञानं न सिद्ध्यति इत्यादि तत्त्वानि शङ्करभाष्ये प्रतिपादितैव दृश्यन्ते। अतः एषा उपनिषद् अद्वैतवेदान्तदृष्ट्या अत्यन्तमुपकारकं भवति। कैवल्योपनिषद् स्पष्टं प्रतिपादयति यत् आत्मज्ञानं विना कैवल्यप्राप्तिः असम्भवा। यद्यपि आत्मज्ञानं वैयक्तिकसाधनमिव दृश्यते, तथापि तस्य सामाजिकमहत्वम् अपि गम्भीरम् । आत्मज्ञानी पुरुषः रागद्वेषादिभिः मुक्तः, अहिंसामयी, सत्यपरायणः, समदर्शी च भवति। एषा दृष्टिः समाजे परस्परसम्मानं, सौहार्दं, धर्मपालनं च वर्धयति।

**मोक्षः—**

मोक्षः कैवल्योपनिषदि केवलं परलोकसिद्धिः न, किन्तु अत्रैव जीवन्मुक्तेः स्वरूपेण व्याख्यायते। जीवन्मुक्तिः इति यत् देहधारणेऽपि आत्मा संसारबन्धात् मुक्तः भवति, आत्मब्रह्मणोः अभेदबोधेन स्थितः भवति, तस्यैव मोक्षस्य पराकाष्ठा इति। कैवल्योपनिषत् मोक्षं केवलं दुःखनिवृत्तिरूपेण न, किन्तु अनन्तानन्दलाभरूपेण निरूपयति। अत्र उपनिषदि स्पष्टं प्रतिपाद्यते यत् मोक्षः न कस्यचित् क्रियाफलम्, न कर्मजन्यः, नापि बाह्योपायैः लभ्यः। सः केवलं ज्ञानजन्यः, यः आत्मब्रह्मैक्यबोधः। तस्मात् मोक्षलाभाय अनिवार्यं साधनं आत्मज्ञानमेव।कैवल्योपनिषदि मोक्षस्य स्वरूपं अद्वैतात्मानुभवरूपेण निरूप्यते। मोक्षे आत्मा ब्रह्मणि लीनो भवति, किन्तु तत्र विलयनं नाशरूपेण न, अपितु तादात्म्यरूपेण। यथा घटाकाशः महाकाशेनैक्यं याति, तथा जीवः ब्रह्मैक्यं याति। यदा जीवः अज्ञानवशात् आत्मनः स्वरूपं विस्मरति, तदा सो देहाभिमानं गृह्णाति। देहाभिमानात् सुखदुःखयोः आस्वादनं, कर्मबन्धनं, पुनर्जन्मचक्रञ्च अनिवार्यं भवति। अज्ञानं नाम जीवस्य प्रमुखं संसारबन्धनकारणम्। अज्ञानस्य नाशादेव मोक्षः प्राप्यते। अतः कैवल्योपनिषत् आत्मज्ञानमेव मोक्षस्य साधनोपायं निर्दिशति।

कैवल्योपनिषदि मोक्षतत्त्वं "कैवल्य" इति शब्देन प्रतिपाद्यते। "कैवल्यम्" इति शब्दः "केवलस्य भावः" इत्यर्थं गमयति। केवलो नाम आत्मा, यो अद्वितीयत्वेन, नित्यत्वेन, शुद्धबुद्धमुक्तस्वभावैः निरूप्यते उपनिषत्सु। तस्य भावः—अर्थात् आत्मनः अखण्डानुभवः—स एव कैवल्यमिति कथ्यते। जीवस्य मोक्षः तदैव संभवति यदा सः आत्मानं शिवस्वरूपं परब्रह्मरूपं च ज्ञात्वा सर्वबन्धनात् विमुक्तो भवति। मोक्षः त्रिविधबन्धननिवृत्तिरूपः। प्रथमः शरीरबन्धनात् मोक्षः—अर्थात् देहाभिमानस्य नाशः। द्वितीयः कर्मबन्धनात् मोक्षः—अर्थात् पुण्यपापयोः अतिक्रमणम्। तृतीयः संसारबन्धात् मोक्षः—अर्थात् जन्ममृत्युभयस्य निवारणम्। कैवल्योपनिषदि एतेषां सर्वेषां बन्धनानां मूलं अज्ञानमेव इत्युक्तम्। यदा

अज्ञानं निवर्तते, तदा मोक्षः स्वत एव सिद्ध्यति। मोक्षः केवलं एकस्मिन् लोकविशेषे स्थितिरिति न, अपितु आत्मस्वरूपे स्थितिः इत्युपपादयति कैवल्योपनिषत्। आत्मैव परं तत्त्वम्, आत्मैव ब्रह्म, आत्मैव शिव इति सूच्यते। आत्मज्ञानस्य सिद्धेः पश्चात् जीवः अनुभवति यत्,—"अहमेव ब्रह्म, अहमेव शिवः, मया भिन्नं किमपि नास्ति" इति। एषोऽखण्डानुभवः जीवस्य कैवल्यावस्था इत्युच्यते। मोक्षे स्थितस्य जीवस्य लक्षणानि कैवल्योपनिषदि स्पष्टरूपेण प्रतिपादितानि । जीवस्यास्य चेतः सर्वथा शान्तं भवति, चित्तवृत्तयः लीयन्ते, रागद्वेषौ नश्यतः, अहंकारो विलीयते। सो न दुःखेन स्पृश्यते, न सुखेन मोह्यते। सोऽत्मानन्दस्वरूपे एव तिष्ठति। बाह्यवस्तुषु तस्य न काचित् आसक्तिः, यतो हि , आत्मानन्द एव तस्य परिपूर्णोऽनुभवो भवति। कैवल्योपनिषदि मोक्षो न केवलं वैयक्तिकमुक्तेः साधनरूपः, किन्तु समाजस्यापि शान्तये प्रेरको भवति। मोक्षलाभेन जीवः अहंकारात् विमुक्तः सन् सर्वभूतेषु आत्मभावं पश्यति। तदा एव सहिष्णुता, मैत्री, करुणा, दया च समाजे वर्धते। अतो मोक्षः केवलं अध्यात्मिकलाभो न, अपि तु सामाजिकधर्मस्यापि मूलम् इति। अतो मोक्षः परमार्थतोऽत्मस्वरूपज्ञानमेव इति कैवल्योपनिषदि उपपादितो दृश्यते। एवमज्ञाननाशः, आत्मतत्त्वबोधः, ब्रह्मैक्यदर्शनम्, अखण्डानन्दानुभवश्चेत्यादीनि मोक्षप्राप्तये साधनानि भवन्तीत्युच्यते।

**उपसंहारः**

कैवल्योपनिषदः आत्मविचारो केवलं तात्त्विकचिन्तनं न, अपि तु जीवनोपयोगी अपि भवति। आत्मज्ञानं दुःखस्य निवारणाय, शान्तेः प्राप्तये, चित्तशुद्धये च अनिवार्यं साधनम्। अनविनाशः आत्मज्ञानात् एव सम्भवति। केवल्योपनिषदि आत्मतत्त्वविचारः स्पष्टतया गम्भीरतया च निरूप्यते। आत्मा ब्रह्मैव ज्ञानेन तस्य साक्षात्कारः, गुरोः महत्वं, ध्यानयोगस्य साधनत्वं इत्येतानि प्रमुखतया प्रकाशन्ते। अस्य उपनिषदः अध्ययनं केवलं बौद्धिकं न, अपि तु आध्यात्मिकजीवनाय मार्गदर्शकं भवति। अत्र प्रस्तुतः आत्मविचारः न केवलं भारतस्य तत्वपरम्परायाः गौरवं वर्धयति, अपि तु मानवजीवनं च परिशुद्धयति। कैवल्योपनिषदि आत्मा शिवरूपेण, साक्षिचैतन्यरूपेण च निरूपितः अस्ति। सः सदा मुक्तः, नित्यमुक्तः, बोधिस्वरूपः च। अज्ञानात् आत्मनः बन्धः भविष्यति, तस्य नाशः ज्ञानादेव। आत्मज्ञानमेव मोक्षस्य मार्गः। एषा उपनिषद् मोक्षमार्गं भक्तियोगेन, ध्यानयोगेन, गुरूपदेशेन च निर्दिष्टन्ति। आत्मा न शरीरम्, न प्राणः, न मनः किन्तु सर्वेषां आधारभूतं सच्चिदानन्दरूपं तत्त्वमेव। अस्य अनुसन्धानस्य मुख्यफलम् इदम्– कैवल्योपनिषत् आत्मतत्त्वं परमार्थदृष्ट्या अद्वितीयं, एकरसतया प्रतिपादयति। यत्र जीवः आत्मनः अन्यः नास्ति, तत्र बन्धमोक्षयोः कल्पना अपि नास्ति। आत्मा न ज्ञेयः, किन्तु स्वानुभूतिगम्यः। आत्मतत्त्वस्य ज्ञानं न केवलं बौद्धिकव्यवहारः, किन्तु अन्तःकरणशुद्ध्या, ध्यानाभ्यासेन, गुरुप्रसादेन च सम्भवति। अतः, कैवल्योपनिषत् आत्मतत्त्वविचारः मोक्षमार्गस्य प्रकाशकः, जीवन्मुक्तेः साधकः, अद्वैततत्त्वस्य प्रत्यक्षानुभवप्रदः च अस्ति। एषः उपनिषद् केवलं वैदिकवाङ्मये स्थानं न धारयति, अपि तु विश्वमानवस्य आध्यात्मिकजीवने चिरन्तनदीपस्तम्भरूपेण स्थितः।

**Endnotes**

1. डयूसन् A German indologist and professor of Philosophy
2. कैवल्योपनिषद् २
3. कैवल्योपनिषद् ४
4. कैवल्योपनिशद् ६

5. कैवल्योपनिषद् १०

## Bibliography


- जगन्नाथ शास्त्री तैलङ्ग, कैवल्योपनिषद्, शैवभारती शोधप्रतिष्ठानम्, वारणसी, 2006
- Aiyar Narayanaswami, Thirty Minor Upanishads,University of Tornoto Archives, 1914
- Chinmayananda Swami, Kaivalyapanishad,Chinmayananda Mission Trust, 2003
- Deussen Paul, Sixty Upanishads of the Veda, Motilal Banarsidass, 1997
- Mahadeva Sastri, Amrita Bindu and Kaivalyapanishads with Commentaries, Popham's Broadway, 1898
- Radhakrishnan Sarvapalli, The Principal Upanishads,New Delhi:Harper collins publishers, India, 1994